This question paper contains 8 printed pages]

Your Roll No. ....................................

**1604**

**B.A. (Hons.)/I (Old Course)** **D**

SANSKRIT —Paper II

(Prose)

*Time : 3 Hours* *Maximum Marks : 75*

*(Write your Roll No. on the top immediately on receipt of this question paper.)*

*Note :—* Unless otherwise required in a question, answers should be written in Sanskrit *or* in Hindi *or* in English.

**टिप्पणी** :— अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर संस्कृत **या** हिंदी **या** अंग्रेजी किसी एक भाषा में दीजिए।

*All* questions are compulsory.

**सभी** प्रश्नों के उत्तर अनिवार्य हैं ।

1. निम्नलिखित का सप्रसंग अनुवाद कीजिए : 6×4=24

Translate the following with reference to the context :

(क) देव, दैवानुग्रहेण यदि कश्चिद् भाजनं भवति विभूतेः तमकमस्मादुच्चावचैरुपप्रलोभनैः कदर्थयन्तः स्वार्थ

P.T.O.

साधयन्ति धूर्ताः । तथा हि केचित्प्रेत्य किल लभ्यैरभ्युदयातिशयैराशामुत्पाद्य मुण्डयित्वा शिरो बद्ध्वा दर्भरज्जुभिरजिनेनाच्छाद्य नवनीतेनोपलिप्यानशनं च शाययित्वा सर्वस्वं स्वीकरिष्यन्ति । तेभ्योऽपि घोरतराः पाषण्डिनः पुत्रदारशरीरजीवितान्यपि मोचयन्ति । यदि कश्चित् पटुजातीयो नास्यै मृगतृष्णिकायै हस्तगतं त्यक्तुमिच्छेत्, तमन्ये परिवार्यमाहुः ।

**अथवा**

(*Or*)

एवमिन्द्रियाणि जेतव्यानि, एवमरिषड्वर्गस्त्याज्यः, सामादिरुपायवर्गः स्वेषु परेषु चातस्रं प्रयोज्यः सन्धि-विग्रहचिन्तयैव नेयः कालः, स्वल्पोऽपि सुखस्यावकाशो न देयः इति तैरप्येभिर्मन्त्रिबकैर्युष्मत्तश्चौर्यार्जितं धनं दासीगृहेष्वेव भुज्यते । येऽपि मन्त्रकर्कशास्तन्त्रकर्तारः शुक्राङ्गिरस-विशालाक्षबाहुदन्तिपुत्रपराशरप्रभृतयस्तैः किमरिषड्वर्गो जितः, कृतं वा तैः शास्त्रानुष्ठानम् ?

(ख) केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यम-प्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम् । अपरिणामोपशमो दारुणो लक्ष्मीमदः । कष्टमनंजनवर्तिसाध्यमपरमैश्वर्य-तिमिरान्धत्वम् । अशिशिरोपचारहार्योऽतितीव्रोदर्पदाहज्वरोष्मा । सततमूलमन्त्रशम्यो विषयविषास्वादमोहः । नित्यमस्नान-शौचवध्यो बलवान् रागमलावलेपः ।

**अथवा**

(*Or*)

न परिचयं रक्षति । नाभीजनमीक्षते । न रूपमालोकयते। न कुलक्रममनुवर्तते । न शीलं पश्यति । न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति । न धर्ममनुरुध्यते । न त्यागमाद्रियते। न विशेषज्ञतां विचारयति । नाचारं पालयति । न सत्यमव-बुध्यते । न लक्षणं प्रमाणीकरोति । गन्धर्वनगरलेखेव पश्यत एव नश्यति । अद्याप्यारूढमन्दरपरिवर्तावर्तभ्रान्तिजनित-संस्कारेव परिभ्रमति ।

(ग) कदलीदलकुंजायितस्यैतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परमपवित्रपानीयं परस्सहस्रपुण्डरीकपटलपरिलसितं पतत्रिकुलकूजितपूजितं पयःपूरितं सर आसीत् । दक्षिणतश्चैको निर्झरझर्झरध्वनिध्वनितदिगन्तरः फलपटलास्वादचचपलितचंचुपतङ्गकुलक्रमणाधिकविनतशाखशाखिसमूहव्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत् ।

**अथवा**

(*Or*)

भगवन्! बद्धसिद्धासनैर्निरुद्धनिश्वासैः प्रबोधितकुण्डलिनीकैर्विजितदशेन्द्रियैरनाहतनादतन्तुमवलम्ब्याज्ञाचक्रं संस्पृश्य, चन्द्रमण्डलं भित्वा, तेजःपुंजमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युंजयैरानन्दमात्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः । तस्मिन् समये भवता ये पुरुषा अवलोकितास्तेषां पंचाशत्तमोऽपि पुरुषो नावलोक्यते ।

(घ) प्राप्तेन स्वभुजार्जितं च सुचिरं चैकाधिराज्यं

चन्द्राह्वेन समग्रचन्द्रसदृशीं वक्त्रश्रियं बिभ्रता ।

तेनायं प्रणिधाय भूमिपतिना धावेन विष्णौ मतिं

प्रांशुर्विष्णुपदे गिरौ भगवतो विष्णोर्ध्वजः स्थापितः ॥

**अथवा**

(*Or*)

मत्तेभगण्डतटविच्युतदानबिन्दुसिक्तोपलाचलसहस्रविभूषणायाः ।

पुष्पावनम्रतरुमण्डवतंसकायभूमेः परं तिलकभूतमिदं क्रमणे ॥

2. (क) प्रश्न संख्या **1** से किन्हीं **पाँच** रेखाङ्कित पदों पर व्याकरणात्मक टिप्पणियाँ लिखिए : 5

Write grammatical notes on any *Five* of the underlined words in Question No. **1**.

(ख) निम्नलिखित में से किन्हीं **पाँच** पर संक्षिप्त टिप्पणियाँ लिखिए : 10

Write short notes on any *five* of the following :

सिद्धासन, शुक्राचार्य, विष्णुध्वज, उच्चैःश्रवा, विष्णुगुप्त, दशपुर, घुणाक्षरन्याय, विश्रुत ।

3. 'कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः'– इस कथन की समीक्षा कीजिये । 8

Critically analyze the statement 'कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः'.

**अथवा**

(*Or*)

'विश्रुतचरितम्' के आधार पर विहारभद्र का चरित्र-चित्रण कीजिए ।

Draw a character sketch of विहारभद्र on the basis of 'Vishrutacharitam'.

4. 'वाणी बाणो बभूव' पर टिप्पणी कीजिए । 8

Comment on 'वाणी बाणो बभूव'.

**अथवा**

(*Or*)

शुकनासोपदेश का सार लिखिए ।

Write the gist of शुकनासोपदेश.

5. 'शिवराजविजयम्' में वर्णित भारत की दुर्दशा का चित्रण कीजिए । 8

Depict the miserable condition of India described in 'शिवराजविजयम्'.

**अथवा**

(*Or*)

अम्बिकादत्त व्यास के जीवन एवं कर्तृत्व पर निबंध लिखिए ।

Write an essay on the life and works of Ambikadatta Vyas.

6. रुद्रदामा के अभिलेख के ऐतिहासिक महत्त्व को लिखिए । 7

Write the historical importance of Rudradaman's inscription.

**अथवा**

(*Or*)

महरौली के अभिलेख का चन्द्र कौन है ? समझाइए ।

Who is the Chandra of Meharauli Inscription ? Discuss.

7. संस्कृत में उत्तर दीजिए : 5

Answer in Sanskrit :

(क) चन्द्रापीडस्य गुरोः किं नाम् ?

(ख) रुद्रदाम्नः पितुः नाम किम् ?

(ग) विश्रुतचरितस्य नायकः कः ?

(घ) शिवराजविजये यवनयूवकः केन घातितः ?

(ङ) विग्रहराजस्य उल्लेखः कुत्र प्राप्यते ?